संस्कृत वार्ता:

दिनाङ्क : 09.10.2026 सायम् : 06:20

## आदौ मुख्यवार्ता:

- जन्तर-मन्तर-स्थले श्वस्तन-प्रतिषेध-प्रदर्शनार्थं दिल्ली-आरक्षि-दलेन प्रत्याख्याता अनुमतिः, अद्य रात्रिनववादनात् दिल्ल्याः सप्तपञ्चाशत् मेट्रो-स्थानकानि पिहितानि भविष्यन्ति।
- श्वः प्रातः चतुर्वादनतः अपराह्णे द्विवादनं यावत् नवदिल्ली-हजरतनिजामुद्दीन-स्थानकयोः आगम्यमाणानि सर्वाण्यपि डाक-द्रुतगामि-रेलयानानि उद्गम-स्थानादेव निरस्तीकृतानि।
- भारत-इथियोपिया-सामरिक-सन्धिः सामूहिक-मूल्येषु दक्षिण-दक्षिण-ऐक्यभावे च प्रतिष्ठितः इति विदेश-मन्त्रिणः डा. एस. जयशङ्करस्य प्रतिपादनम् ।
- विदेश-मन्त्रालयेन स्पष्टीकृतं यत् पर्म-प्रक्रिया-निलम्बनं एच-1 बी-वीसा वैधतां न बाधते ।
- क्रिकेट-क्रीडायाम् राञ्ची-नगरे भारत-वेस्टइण्डीज़-दलयोः मध्ये द्वितीया विंशति-प्रतिविंशतिः अन्ताराष्ट्रिय-प्रतिस्पर्धा अद्य सायं आयोजिष्यते ।

## अथ वार्ता: विस्तरेण

### सीजेपी-प्रदर्शनम्

दिल्ली-आरक्षि-बलेन श्वः जन्तर-मन्तर-स्थले सीजेपी इत्यनेन आयोजयितुं निश्चितस्य प्रस्तावित-विरोध-प्रदर्शनस्य अनुमतिः अद्य प्रत्याख्याता। अद्य प्रातःकाले नवदिल्ल्यां वार्ताहरान् सम्बोधयन्ती दिल्ली-आरक्षि-बलस्य संयुक्तायुक्ता नूपुर-प्रसादः अवोचत् यत् जन्तर-मन्तर-स्थले प्रतिषेध-सभानाम् अथ अन्य-कार्यक्रमाणाम् आयोजनाय दश-दिवसेभ्यः पूर्वमेव आवेदनपत्रं समर्पणीयम्। संयुक्त-आरक्ष्यायुक्तया स्पष्टीकृतं यत् अनेन समूहेन पूर्वमपि अस्मिन् स्थले विरोध-प्रदर्शनाय अनुमतिः लब्धा आसीत्, किन्तु तैः निर्धारितानां मार्गदर्शिकानां अत च समर्पितानाम् आश्वासन-पत्राणाम् अनुपालनं न कृतम्। सा न्यरूपयत् यत् वर्तमान-शान्ति-व्यवस्थां लोकसुरक्षां अथ च नवदिल्ली-क्षेत्रस्य यातायात-नियमनं दृष्ट्वा अनुमति-निषेधस्य अयं निर्णयः गृहीतः।

नूपुर-प्रसादेन अग्रे प्रतिपादितं यत् क्षेत्रेऽस्मिन् लोक-सुरक्षायै, व्यवस्था-रक्षणाय भारतीय-नागरिक-सुरक्षा-संहितायाः त्रिषष्ट्यधिकैकशतम् इति धारायाः अन्तर्गतं निषेधाज्ञा प्रवृत्ता। संयुक्तायुक्तया सचेतितं यत् विधि-नियम-उल्लङ्घनकारिणः कस्यापि जनस्य विरुद्धं दिल्ली-आरक्षि-बलेन समुचितं वैधानिकं कार्याचरणं विधास्यते।

### मेट्रो-पिधानम्

दिल्ली-मेट्रो-रेल-निगमेन सूचितं यत् राष्ट्रिय-राजधानी-क्षेत्रे सुरक्षा-दृष्ट्या अद्य रात्रौ नववादनतः श्वः यावत् मध्य-दिल्ल्याः सप्तपञ्चाशत् मेट्रो-स्थानकानि पिहितानि भविष्यन्ति। एतेषु पिहितेषु स्थानकेषु राजीव-चौक, लोक-कल्याण-मार्ग, केन्द्रीय-सचिवालय , जनपथ, पटेल-चौक, नवदिल्ली, सेवातीर्थ अथ च मण्डी-हाउस-प्रभृतीनि प्रमुख-स्थानकानि सम्मिलितानि सन्ति।निगमेन स्पष्टीकृतं यत् नवदिल्ली-मेट्रो-स्थानकं विहाय अन्येषु सर्वेषु सम्बद्ध-स्थानकेषु मेट्रो-परिवर्तनस्य सुविधा पूर्ववत् उपलभ्या भविष्यति। मेट्रो-प्रशासनेन उक्तं यत् स्थानक-पिधानस्य अयं निर्णयः अग्रिम-सूचनां यावत् प्रभावित्वेन स्थास्यति।

### प्रधानमन्त्री-विश्वकौशलप्रतिस्पर्धायाः

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां स्व-निवासस्थाने षड्विंशत्यधिक-द्विसहस्रतमस्य विश्व-कौशल-प्रतिस्पर्धायाः भारतीय-युव-विजेतृभिः सह सम्भाषणं कृतवान्। सामाजिक-पटलीय-सन्देशे प्रधानमन्त्रिणा प्रतिपादितं यत् अस्मिन् जागतिक-आयोजने भारतीय-युवानः दीप्तिमन्तः अभवन्। सः सम्पूर्णेन दलेन सह संवादं विहितवान् अथ च तेषाम् उत्कृष्ट-प्रदर्शनाय अभिनन्दनं व्याहृतवान्।

उल्लेखनीयं वर्तते यत् अस्यां स्पर्धायां भारतेन षट् रजत-पदकानि सहैव विंशतिः उत्कृष्टता-पदकानि विजितानि, येन देशः प्रथमवारं जागतिक-स्तरे दशमं स्थानम् अवाप्तवान्। इयं जागतिक-कौशल-प्रतिस्पर्धा विगत-मासस्य द्वाविंशति-दिनाङ्कतः सप्तविंशति-दिनाङ्कं यावत् चीन-देशस्य शङ्घाई-नगरे समायोजिता आसीत्।

## रेल-निरस्तीकरणम्

अद्य अपराह्णे द्विवादनतः प्रस्थानं कुर्वन्ति सहैव श्वः प्रातः चतुर्वादनतः अपराह्णे द्विवादनं यावत् नवदिल्ली-हजरतनिजामुद्दीन-रेलस्थानकयोः प्राप्यमाणानि डाक-द्रुतगामि-रेलयानानि तानि सर्वाण्यपि आरम्भ-स्थानकादेव निरस्तानि भविष्यन्ति। रेल-मन्त्रालयेन स्पष्टीकृतं यत् श्वः उभयोः रेल-स्थानकयोः परितः मार्गेषु सम्भावितं भीषण-यातायात-सङ्कटमवलोक्य अयं निर्णयः गृहीतः।

**प्रोमो - सोशल मीडिया**

## न्यायालय-मेट्रोसेवाः

सर्वोच्च-न्यायालयेन अक्टूबर-मासस्य दशमे दिनाङ्के सीजेपी दलस्य प्रतिषेध-प्रदर्शनम् अभिलक्ष्य राष्ट्रिय-राजधानी-क्षेत्रे मेट्रो-रेलयानानां पूर्ण-निलम्बनं न स्यात् इति सुनिश्चेतुं केन्द्र-सर्वकाराय सम्बद्ध-प्राधिकारिभ्यश्च निर्देशः दत्तः। भारतस्य प्रधान-न्यायाधीशस्य सूर्यकान्तस्य अध्यक्षतायां न्यायमूर्तेः जयमाल्या-बागची इत्यस्य अथ च न्यायमूर्तेः वी.मोहनायाः पीठेन स्पष्टीकृतं यत् दैनिक-यात्रिकाणाम् असुविधां न्यूनीकर्तुं लोक-परिवहन-सेवाः नियन्त्रित-रूपेण प्रचालनीयाः। पीठाग्रे महान्याय-अभिकर्ता तुषार-मेहता आश्वासितवान् यत् प्रशासनेन निर्गताः प्रतिबन्धाः पुनर्विमृश्यन्ते । न्यायालयः आनुपातिकता-सिद्धान्तम् प्रतिपादयन् अवोचत् यत् सुरक्षा-रक्षणाय सेवानां नियमनं पूर्ण-निषेधात् भिन्नं वर्तते। शीर्ष-न्यायालयेन मेट्रो-रेलयानानां सञ्चालन-निर्णयान्, यातायात-प्रतिबन्धान्, मार्ग-अवरोध-पुनःसमीक्षां अथ च वैकल्पिक-मार्गाणां विषये सर्व-साधारणाय पर्याप्त-प्रचार-प्रसारं कर्तुं प्राधिकारिणः आदिष्टाः, येन जन-सामान्यस्य असुविधा न भवेत्।

## प्रधानमन्त्री शिखरसम्मेलनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां महिला-बालविकास-विभागीय-शिखरसम्मेलनस्य समापन-सत्रे भागं ग्रहीष्यति। ह्यः आरब्धे अस्मिन् द्विदिवसीये सम्मेलने सर्वेषां राज्यानां महिला-बालविकास-सम्बद्धाः मन्त्रिणः, राजनीतिक-नेतारः,वरिष्ठ-प्रशासनिकाधिकारिणश्च सहभागितां कुर्वन्ति। प्रधानमन्त्रिणः परिकल्पनया आयोज्यमानानां विभागीय-शिखरसम्मेलनानां शृङ्खलायाम् इदं द्वितीयं सम्मेलनं वर्तते। अस्य मुख्यम् उद्देश्यं सहकारी-सङ्घीय-व्यवस्थायाः सुदृढीकरणम्, राष्ट्रिय-प्राथमिकतानां प्राप्तये सामूहिक-उत्तरदायित्व-भावनायाः संवर्धनं अथ च केन्द्र-राज्ययोः दृढ-सहयोगेन कार्य-परिणामानां द्रुतीकरणम् अस्ति। अस्मिन् सम्मेलने चतुर्षु प्रमुख-विषयेषु दृष्टिः केन्द्रीकृता अस्ति। पोषणम् , प्रारम्भिक-शिक्षा, बाल-संरक्षणम् महिलानां सुरक्षा सशक्तीकरणं चेति।

## विदेशमन्त्रालय-प्रतिक्रिया

विदेशमन्त्रालयेन स्पष्टीकृतं यत् अमेरिका-देशस्य श्रम-विभागेन कतिपय-संस्थानां कृते स्थायि-श्रम-प्रमाणीकरण-कार्यक्रमे गृहीतः निर्णयः एच-1 बी-वीसा-कार्यक्रमात् सर्वथा पृथक् वर्तते। मन्त्रालयेन स्ववक्तव्ये प्रतिपादितं यत् पर्म-आवेदन-पत्राणां निलम्बनेन स्वयं एच-1 बी-वीसा-वैधतायां वा तद्धारकाणां तेषां च आश्रितानां वर्तमान-स्थितौ कोऽपि प्रत्यक्ष-प्रभावः न भविष्यति। यद्यपि प्रभावित-संस्थानां योग्यानां कर्मचारिणां स्थायि-निवास-प्रक्रियायां कश्चन प्रभावः सम्भाव्यते। अस्मिन् सन्दर्भे अमेरिका-देशस्य उपराष्ट्रपतिनः टिप्पण्यः अनुचिताः इति आक्षिपता मन्त्रालयेन उक्तं यत् एतादृशानि वक्तव्यानि तथ्यम् उपेक्षन्ते। भारतेन दृढतया प्रतिपादितं यत् अमेरिका-देशे कार्यरताः भारतीयाः कुशलाः वृत्तिकाः उच्च-शिक्षिताः सन्ति अथ ते तद्देशस्य अर्थव्यवस्थायां नवनिर्माण-पारिस्थितिकी-तन्त्रे च महत्त्वपूर्णम् अवदानं यच्छन्ति।

## जयशंकर-इथियोपिया

विदेशमन्त्रिणा डा.एस. जयशङ्करेण प्रतिपादितं यत् भारत-इथियोपिया-देशयोः सामरिक-सन्धिः परस्पर-सहभागि-मूल्येषु समान-आकाङ्क्षासु अथ च ऐतिहासिके दक्षिण-ऐक्यभावे प्रतिष्ठिता अस्ति। डा.जयशङ्करः अदीस-अबाबा-नगरे स्व-समकक्ष्येण इथियोपिया-

देशस्य विदेश-मन्त्रिणा गेडियन-तिमोथिवोस्-हेस्सेबोन् इत्यनेन सह द्विपक्षीय-वार्ता विहितवान्। सामाजिक-पटलीय-सन्देशे तेन सूचितं यत् अस्यां वार्तायां व्यापार-निवेश-विकास-परियोजनाभ्यः आरभ्य आधारभूत-संरचना-सामुद्रिक-सुरक्षा-प्रौद्योगिकी-सांस्कृतिक-क्षेत्राणि यावत् द्विपक्षीय-सम्बन्धानां दृढीकरणे दृष्टिः केन्द्रीकृता आसीत्।

उभाभ्यां पक्षाभ्यां वैश्विक-घटनाक्रमेषु स्व-दृष्टिकोणानाम् आदान-प्रदानं कृतम्, अथ च बहुपक्षीय-मञ्चेषु सहभागितायाः भारत-अफ्रीकी-सङ्घ सहकार्यस्य च संवर्धने सम्मतिः प्रकटीकृता।

**<u>क्रिकेट्-क्रीडा</u>**

क्रिकेट्-क्रीडायाम् अद्य भारत-वेस्टइण्डीज-दलयोः मध्ये पञ्च-प्रतिस्पर्धात्मिकायाः विंशतिः-प्रतिविंशतिः अन्ताराष्ट्रिय-शृङ्खलायाः द्वितीया प्रतिस्पर्धा राञ्ची-नगरे आयोजिष्यते। इयं स्पर्धा भारतीय-समयानुसारं सायङ्काले सप्तवादने प्रारप्स्यते। शृङ्खलायां भारतीयेन दलेन पूर्वमेव एकं-शून्यं इत्यङ्कान्तरालेन अग्रता प्राप्ता वर्तते ।

**।। इति वार्ताः ।।**